International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2018; 4(2): 36-41
© 2018 IJSR
www.anantaajournal.com
Received: 15-01-2018
Accepted: 16-02-2018

**डॉ. कावेरी नारायणराव जाधव**
Assistant Professor,
Centre of Advanced Study in Sanskrit, Savitribai Phule Pune University, Pune, Maharashtra, India

**Correspondence**
**डॉ. कावेरी नारायणराव जाधव**
Assistant Professor,
Centre of Advanced Study in Sanskrit, Savitribai Phule Pune University, Pune, Maharashtra, India

# नाटिका - रूपकं वा उपरूपकम् ?

**डॉ. कावेरी नारायणराव जाधव**

सारांश

अस्मिन् शोधपत्रे नाटिकायाः रूपकव्यवस्थायां स्थानविषये संख्याभिधान-वैशिष्ट्यमधिकृत्य आभरतात्विवेचनमुपस्थापितं तथा च तत्स्थानं कथं परिवर्तितमित्यपि प्रस्तूतम्। आदौ रूपकान्तरमनन्तरं रूपकं, पश्चात्संकीर्णरूपकमन्ततः उपरूपकमिति नाटिकायाः अवस्थान्तराणि दरीदृश्यते।

कुट शब्दः नाट्यम्, नृत्यम्, रूपकम्, उपरूपकम्, संकीर्णरूपकम्, रस, भाव, पदार्थाभिनय, वाक्यार्थाभिनय, नाटि, नाटिका

## प्रस्तावना

*नाटयं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्* [1], *नाटकान्तं कवित्वं तथा च काव्येषु नाटकं रम्यम्* इत्यादयः उक्तयः सर्वश्रुता एव। आचिरात्कालात् मनुष्येन स्वस्य समाजस्य च विनोदनाय तथा च प्रबोधनाय रूपकाः प्रयुक्ताः [2]। अत्र भरतनाट्यशास्त्रेण दत्तं नाट्योपत्त्याः विवेचनं पुष्टिमेव ददाति। नाट्यांशः वैदिककाले यज्ञयागादीनामपि अविभाज्यमङ्गमासीत्।

आकालिदासात् हर्षपर्यंतं नैकैः नाटककारैः नैकान् रूपकप्रकारान् आश्रित्य संस्कृतसाहित्यं पल्लवितं पुष्पितं च। यद्यपि प्राचीनकाले भारते बह्वयः नाट्यशास्त्रपरंपराः तत्सिद्धान्ताश्च आसन् किन्तु गच्छता कालेन केवलं भरतस्य नाट्यपरंपरा अवशिष्टा। अन्यपरम्परासु विलसितानां ज्ञानलवानां सम्प्राप्तिः भरतानुसारिग्रन्थेष्वेव भवति। अस्मिन् शोधपत्रे नाटिकायाः रूपकव्यवस्थायां स्थानमधिकृत्य आभरतात्विवेचनमुपस्थाप्यते तथा च तत्स्थानं कथं परिवर्तितमिति प्रस्तूयते।

भरतमुनिभिः तेषां नाट्यशास्त्रस्याष्टादशाध्याये प्रसिद्धानां दशरूपकाणां विवेचनं प्रस्तुतम् [3]। अस्मिन्निरूपणे उपरूपकाणां उल्लेखोऽपि न वर्तते। अतः उद्देशकारिकायां गणितानि दशरूपकानि एवं सन्ति।

नाटकं सप्रकरणं व्यायोग एव च।
भाणः समवकारश्च वीथी प्रहसनं डिमः।।
ईहामृगश्च विज्ञेयो दशमो नाट्यलक्षणे। 4

अत्र कारिकाद्वये नाटिकायाः उल्लेखः न प्राप्यते। एतेषां रूपकाणामुद्देश-लक्षण-पद्धतिमनुसृत्यालोडनं कृतम्। अतः आदौ तेषामेतयोः कारिकयोः परिगणनां कृत्वा अननन्तरमनुपूर्वशः तेषां सविस्तरेण वस्तु-नायक-रसमाश्रित्य विवेचनं दत्तम्। यस्मात् नाटिकायाः उल्लेखोऽत्र न वर्तते तस्मात् तदनु विवेवचनस्यावसरोऽपि नास्ति। तथापि अस्मिन्विवेचने नाटक-प्रकरणनिरूपणानन्तरं द्विपञ्चाशत्श्लोकतः पञ्चपञ्चाशत्श्लोकपर्यंतं (५२-५५) आर्यावृत्तनिबद्धायां श्लोकचतुष्टये नाटिकायाः विवेचनं प्राप्यते।

अत्र दशरूपकेषु नाटिकायाः अद्वितीयमुदाहरणं भवति यच्च उद्देशस्थाने अपरिगणितमपि लक्षणस्थाने वर्णितमस्ति। एवं समग्रग्रन्थे उद्देश-लक्षण-पद्धतिमनुसरन्तः भरताचार्याः कथमत्रैव विसंगतिमपवादमाकर्षन्तीति विचारणीयं भवति। अतः तेषां श्लोकानां प्रामाण्यविषये प्रश्नः उपस्थाप्यते । यदि भरताचार्यः सत्यमेव नाटिकायाः वर्णनं कर्तुमैच्छत् तर्हि तेनैव तस्याः अन्तर्भावः कारिकायां कृतः स्यात्। किंन्तु वस्तुतः एवं न कृतम्। अपरं तु चतुसृषु कारिकासु प्रथमा कारिका 5 नाट्यशास्त्रस्य टीकाकारैः अभिनवगुप्तैः न विवेचिता। अतः वयं एवमनुमातुं पारयामः यदभिनवगुप्तानन्तरं (खैस्ते १०-११तमं शतकानन्तरं) नाट्यशास्त्रस्य पाठे अस्याः कारिकायाः प्रक्षेपः अभवत्। अपि च एषा कारिका धनञ्जयकृतदशरूपकस्य टीकाकारेण धनिकेनोद्धृता। तत्र एतस्याः कारिकायाः पाठभेदद्वयं वर्तते। 6 अतः कारिकाविषये बहुप्रवादः जातः स्यादिति वक्तुं शक्यते।

भरताचार्यादनन्तरं आविर्भूतैः कोहलादिभिः नाट्याचार्यैः आदौ परिगणिताद्दशरूपकादन्यरूपकोपरूकप्रकाराः अपि स्वीकृताः। तेषु रूपकेषु नाटिका सुप्रयुक्ताज्ञाता चासीत्, तस्मात् तस्याः प्रमाणीकरणाय सा भारतीयदशरूपेकषु समाविष्टा स्यात्। कालान्तरेण सा मूलग्रन्थस्याविभाज्यांशरूपेण रूढा अभवत्। कोहलाचार्येण रूपकाणां विस्तरः कृतः इति प्रचलितं मतम्। स्वयं भरतेनैव नाट्यशास्त्रे भाविकथनं कृतं यद् कोहलः शेषमुत्तरतन्त्रं कथयिष्यति। 7 अतः यद्यपि नाट्यशास्त्रस्य एककर्तृत्वेन भरतमेव अङ्गीकुर्वन्ति तथापि नैकैः आचार्यैः स्वयोगदानेन ग्रन्थस्योपबृंहणं कृतमस्ति। स्वयं मुख्यकर्त्रा तदादिष्टं चासीत्। नाट्यशास्त्रमधिकृत्य कोहलाचार्यैः अन्यग्रंथसम्भारोऽपि निर्मितः स्यात्। कालान्तरेण कोहलाचार्यकृत्ग्रन्थ-सम्पत्भारतीयपरम्परायां नाट्यशास्त्रवत् गौरवभाक् अभवत् स्यात्। अतः नाट्यपरम्परायाः विस्तरप्रसरः सम्मतोऽध्याहृत एव।

अथास्यां पार्श्वभूम्यां यदा अभिनवपादाः नाट्यशास्त्रोस्योपरि टीकालेखनाय प्रवृत्ताः तदा तैः प्रक्षिप्तं पश्चात्स्थापितं वा नाटिकास्वरूपविवेचकं श्लोकत्रयं निरूपितम् । तैः न केवलं तेषां निरूपणं कृतं किन्तु तेषामन्तर्भावस्य समर्थनमपि कृतम् यतः भरतमुनिभिः अस्याध्यायस्यादावेव कथितं यत्ते रूपकाणां विवेचनं नामतः कर्मतः प्रयोगतश्च करिष्यन्ति। 8 अत्र अभिनवगुप्तः प्रयोगपदस्यार्थः रूढार्थेन अविधाय उक्तरूपकाणामुचितपरस्परसम्बन्धात् संज्ञातानि रूपकोपरूपकानि अधिकृत्यकृतं विवेचनमिति अकरोत्। 9 एवं प्रकारेण ज्ञायते यदभिनवपादाः कोहलाचार्यस्य सुप्रतिष्ठितैः नवनाट्यप्रकारैः सुपरिचिताः आसन्। अतः तैः कारिकात्रयं 10 व्याख्यातम्। तथा च नाटिकायाः श्लोकत्रयाणां व्याख्यानं कुर्वन्तः आचार्याः कथयन्ति यद् रूपकाणां संकरेण बहवः भेदाः संभवन्ति। अत्र तु प्रधानभूतयोः नाटकप्रकरणयोः संकरेणोद्भूतां नाटिकां दर्शयित्वा अन्य रूपकाणां संकरेण संज्ञातानां भेदानां ज्ञानं भवेदिति विचिन्त्य नाटिका लक्षिता। 11 अत्र अभिनवपादैः प्रधानभूतानां रूपकाणां सांकर्येण जाताः भेदाः इत्युल्लिख्य तेषां तद्भवत्वं अधोरेखितं यदग्रे गत्वा आधुनिकैः व्याख्याकारैः (derivative) इति आङ्ग्लभाषिकपदेनाभिहितं येन तेषाम् उपरूपकात् पार्थक्यं दर्शितम्। अग्निपुराणस्य नाटकनिरूपणं नामाष्टत्रिंशदधिकत्रिशततमे अध्याये रूपकं रूपकोपरूपकप्रकारेण स्वतंत्रतया अविभज्य सप्तविंशति नाटकस्य नामानि दत्तानि। तेषु

भरतोक्त दशरूपकाणि सप्तदशोपरूपकाणि चान्तर्भूतानि। 12 तेषु नाटिका अन्यतमा वर्तते।

तत्र रूपकोपरूपकेति वा संज्ञां हित्वा नाटकेति संज्ञा रूपकार्थेन सामान्येन प्रयुक्ता। अतः अग्निपुराणं नाटिकायाः स्वरूपनिर्धारणाय न सहाय्यभूतं भवति।

दशरूपककृता धनञ्जयेन दशरूपकाणामुद्देशकारिकां प्रथमप्रकाशे दत्वा तृतीयप्रकाशे तेषां लक्षणानि दत्तानि। आदौ तेषां 'दशधैव' इति संख्यानिर्धारणं कृतम्। 13 रूपकसंख्याविवर्धनार्थं तत्कालीकान् जायमानान् प्रयत्नान् निरोद्धुम् अवधारणमावश्यकमिति तेन चिन्तितं स्यात्। तथा च नाटिकायाः समावेशः तस्याः संकीर्णत्वात् रूपकेष्वसंभवमित्यपि दर्शितम् यतः दशरूपकेषु केवलं शुद्धरूपकाणां गणना अपेक्षिता । धनिकेन एवेतिपदस्य महत्त्वं दर्शयितुं रूपकान्तरान् गणयन्ती एका कारिका उद्धृता 14 येन रसाश्रयान्नाट्यात् कारिकागतरूपकान्तराः भिन्नाः, तेषां भावाश्रयत्वात् इति प्रतिपादितम्। अतः नाट्यस्य रसाश्रयत्वं, नृत्यस्य भावाश्रयत्वं, नृत्तस्यताललयाश्रयत्वं च स्पष्टीकृतम्। कारिकागताणां रूपकान्तराणां अग्रे गत्वा उपरूपकमिति व्यपदेशोऽभवत् किंन्तु धनञ्जयेन अथवा धनिकेन कुत्रापि तानुपरूपकमिति संज्ञा न दत्ता। धनञ्जयेन दशरूपकविवेचनाय भरतस्य अनुक्रमसरणिः अवलम्बिता, अतः तत्र नाटिकायाः समावेशः प्रकरणस्य पश्चात् दृश्यते। एवं प्रकारेण धनञ्जयेन नाटिकायाः अन्तर्भावः न रूपकेषु कृतः नापि उपरूपकमितिपदेन व्यपदिष्टेषु रूपकान्तरेषु। संकीर्णरूपकमिति नाम्नि स्वतंत्रवर्गे सा स्थापिता। 15 नाटिकायाः लक्षणं कुर्वन्तः भरताचार्यान् समर्थयन् धनिकः कथयति यद् -अतोऽनुद्दिष्टायाः नाटिकायाः यन्मुनिना लक्षणं कृतं तत्रायमभिप्रायः – शुद्धलक्षण-सङ्करादेव तल्लक्षणे सिद्धे लक्षणकरणं सङ्कीर्णानां नाटिकैव कर्तव्येति नियमार्थं विज्ञायते इति। 16

धनञ्जयान्तरं नाट्यवित्सु रामचन्द्र-गुणचन्द्रौ आविर्भूतौ। तयोः नाट्यदर्पणमिति ग्रन्थस्य प्रथमविवेके उद्देशकारिकायां ताभ्यां भरतोक्तदशरूपकैः सह नाटिकाप्रकरणीं परिगण्य द्वादशरूपकाणि दत्तानि। 17 अस्मिन्ग्रन्थस्य द्वितीयविवेके ताभ्यां नाटिकायाः लक्षणानि प्रतिपादितानि। 18 अतः नाट्यदर्पणकारेभ्यां नाटिकायाः दशरूपकैः सह गणनां कृत्वा तस्यै रूपकस्थानं प्रदत्तमिति वक्तुं शक्यते।

हेमचन्द्रेन काव्यानुशासन नाम्नि स्वग्रन्थस्याष्टमे अध्याये काव्यं प्रेक्ष्यं श्रव्यं चेति विभज्य पाठ्यस्य भेदरूपेण रूपकाभेदाः कथिताः। तत्र तेन सट्टकनाटिकां सम्मील्य द्वादशरूपकाणि निगदितानि। 19 ततः नाटकात् विथ्यन्तानि रूपकानि वाक्यार्थाभिनय-स्वभावानीति कथयित्वा तेषां रसाश्रयत्वं तथा च नाट्यत्वं सूचितम्। अपरं च भावाश्रितात् नृत्यात्, तत्संजातात् उपरूपकेभ्यः भिन्नत्वं च दर्शितम्। नाटिकां नाटकप्रकरणयोः सन्निहितं स्थापयित्वा तस्याः दशरूपकेषु स्थानमप्युक्तम्।

भावप्रकाशनकारेण शारदातनयेन तु दशधैव रूपकमभिहितं तथा च नाटिका-सट्टकयोः रसाश्रयत्वात् तयोः अन्तर्भावः नाटकादिष्वैव दर्शितः। सः अन्तर्भावः पुरातनकालैव सुस्थापितः। एवं प्रकारेण नाटिकायाः नाटकेन वा प्रकरणेन सह अभेदोऽपि दर्शितः।२०तेन नाट्यनृत्ययोः भेदोऽपि विस्तरेण दर्शितः। 20 किन्तु अग्रे गत्वा नवमे अध्याये तेन विंशतिः नृत्यभेदाः कथिता। पुनः तेषु नाटिका अन्यतमेन रूपेण गणिता। यतः शारदातनयः रूपकाणां दशेति संख्यानिर्धारणं करोति अपि च नाटिका-सट्टकौ नाटकस्यांशरूपेण दर्शयति ततश्च नवमाधिकारे उल्लिखितेषु नृत्यभेदेष्वपि तयोः (नाटिका-सट्टकयोः) अन्तर्भावमपि करोति, तस्मात् शारदातनयमतानुसारेण नाटिकायाः स्थाननिर्धारणे काठिण्यमनुभूयते।

साहित्यादर्पणकारेण विश्वनाथेन ग्रन्थस्य षष्ठाध्याये भरतोक्तदशरूपकाणि उद्धृतानि। तथा च अष्टादशोपरूपकेषु नाटिका अन्तर्भूता। 21 किन्तु नाट्यनृत्ययोः भेदः, उपरूपकस्य लक्षणं, पूर्वसूरीणां मतानां खण्डनं, स्वमतस्य मण्डनं न प्रस्तुतम्। अतः नृत्यस्योपरूपके कथं स्थित्यंतरमभवत् इति ज्ञातुं न शक्यते।

अथ रूपकाणां संख्यां तथा च तेषु नाटिकायाः स्थानमधिकृत्य विविधानि मतानि अत्रोपस्थापितानि। केचित् तस्याः समावेशः

रूपकेषु अकुर्वन्, केचित् संकीर्णरूपकेषु अन्ये तूपरूपकेषु वा नृत्येषु। बाहुल्येन भरतोक्तदशरूपकसिद्धान्तस्य महत्त्वं रक्षणार्थं तथा च सुप्रतिष्ठितायाः नाटिकायाः महत्त्वं स्थापयितुं कैश्चित् तस्याः अन्तर्भावः संकीर्णरूपकेष्वेव कृतः इति दृश्यते। भरताचार्याभिनवगुप्तधनञ्जयधनिकैः नाटिका संकीर्णरूपकभेदः इत्यानुसारेण निरूपिता। नाटिका इति नामाभिधानमेव तस्याः नाटकस्यसंकीर्णत्वं दर्शयति।अन्यत्तु नाटिका भरतनाट्यशास्त्रे नाटि इत्यभिहिता। अनन्तरं हेमचंद्रारामचंद्रगुणचंद्राः रूपकव्यवस्थायां नाटिकामधिस्थाप्य तस्याः आस्फालनं कृतवन्तः। तदनु विश्वनाथेन सा उपरूपकेषु स्थापिता, तमनुगतैः नाट्यविद्भिः तस्याः उपरूपकेषु स्थानं दृढीकृतम्।

पुराकाले उपरूपकमिति संज्ञा एव न दृश्यते। तत्स्थाने रूपकान्तरप्रकारः वा गेयकाव्यमथवा नृत्यभेदः इति संज्ञा दरीदृश्यते। भरतनाट्यशास्त्रे प्रधानरूपकस्य कृते रूपेति संज्ञा प्रयुक्ता। अतः तत्रोपरूकस्य कृते अवसरः एव नास्ति। धनिकेन, शारदातनयेन च उपरूपकान् दर्शयितुं नृत्यभेदाः इति पदं प्रयुक्तम्। तानन्यरूपकप्रकाराः इति कथयन्तः रामचन्द्रगुणचन्द्रग्निपुराणकाराः तेषामवरवत्वं दूरीकृत्वा तान् गौरवं दत्तवन्तः। विश्वनाथेन तेषामपरूपकमिति नामधेयं रूढीकृतम्। धनिकेन गणितात् सप्तभेदात् शारदातनयदत्तविंशतिभेदपर्यंत तेषां विवर्धनं तान् प्रति लोकप्रीतिः अभिव्यनक्ति। अतः उपरूपकमिति संज्ञा उत्तरकालीना इति सिद्धं भवति। न केवलं अत्र नामाभिधानस्य वा संख्यावर्धनस्य भेदः दृश्यते अपि तूपरूपकस्य संक्रमणमपि दृश्यते। आदौ केवलं नृत्यगीतवादनआङ्गिकाभिनययुतं नृत्यं पश्चात्कालात् वाचिकाभिनययुतमपि अभवत्। तदनु तत्सन्धिरससंपृक्तमपि अभवत्। एवं प्रकारेण रूपकस्य गुणादानेन तेषां रूपं परिवर्तितम्। अतः ते उपरूपकमिति संज्ञया प्रख्याता अभवन्। यथा विवर्धनमेव प्राणभृताणां लक्षणम् वर्तते तद्वत् कस्यापि शास्त्रस्य कृते अवस्थान्तरमावश्यकं भवति। अत्र रूपकान्तरात् नृत्यं ततः गेयपाठमनन्तरं उपरूपकमिति विकासक्रमः दृश्यते। तत्र नाटिकायाः स्थानमधिकृत्यापि मतान्तराणि आसीत्। किन्तु रूपकमिति चरमे स्थाने अथवा उपरूपकमिति अधमेस्थाने नाटिकां अस्थापयित्वा संकीर्ण-रूपकेषु यदि सा स्थापयते तर्हि समीचीनं भवेत्।

**संदर्भाः**

1. मालविकाग्निमित्रम्, १.४.
2. नाट्यशास्त्रम्, १.१०९-१११,११५.
3. बडोदा-संस्करणमधिकृत्य, अन्यथा काशी संस्करणे विंशऽध्यायः। दशरूपनिरूपणम् अथवा दशरूपविधानं नाम अध्यायः।
4. नाट्यशास्त्रम् १८.२-३.१.
5. अनयोश्च बन्धयोगादन्यो भेदः प्रयोक्तृभिः कार्यः।प्रख्यातस्त्वतरो वा नाटकयोगे प्रकरणे वा। तत्रैव १८.५२.
6. अनयोश्च बन्धयोगादेको भेदः प्रयोक्तृभिर्ज्ञेयः।
7. प्रख्यातस्त्वितरो वा नाटीसंज्ञाश्रिते काव्ये ।। दशरूपकम् ३.४२ श्लोकोपरि व्याख्या।
8. शेषमुत्तरतन्त्रेण कोहलः कथयिष्यति। प्रयोगं कारिकांश्चैव निरुक्तानि तथैव च।। नाट्यशास्त्रम्, ३६.६९.
9. वर्तयिष्याम्यहं विप्रा दशरूपविकल्पनम् । नामतः कर्मतश्चैव तथा चैव प्रयोगतः।।१।। तत्रैव १८.१.
10. प्रकृष्ट उचितो योगः परस्परसंबन्धो यथा प्रकरणनाटकलक्षणयोगात् नाटिकेति। वृतिविभागस्तु लक्षण एवानुप्रविष्ट इति नासौ प्रयोगः। तथा चेति तेनैव प्रयोगप्रकारेणान्योऽपि परस्परसंबन्धवैचित्र्यकृतो भेद उत्प्रेक्ष्य इत्यर्थः। प्रयोगाय प्रयोगतः इति व्याख्याने प्रयोगतः इति विफलमेव। उक्तव्याख्याने तु कोहलादिलक्षिततोटकसट्टकरासकादिसंग्रहः फलम् नाटिकाया उदाहरणत्वादिति। नाट्यशास्त्रम्, १८.१ उपरि, अभिनवभारती । पृ. ५.

11. प्रकरणनाटकभेदादुत्पाद्यं वस्तु नायकं नृपतिम्। अन्तःपुरसंगीतककन्यामधिकृत्य कर्तव्या।।५३।।
12. स्त्रीप्राया चतुरङ्का ललिताभिनयात्मिका सुविबिताङ्गी।बहुनृत्तगीतपाठ्या रतिसंभोगात्मिका चैव।।५४।।
13. राजोपचारयुक्ता प्रसादक्रोधदम्भसंयुक्ता।नायकदेवीदूतीसपरिजना नाटिका ज्ञेया।।५५।। नाट्यशास्त्रम्, ५३¬-५५, पृ.- ८५.
14. तत्र रूपकलक्षणसंकीर्णतया बहवो भेदाः सन्तीत्युक्तं सामान्यलक्षणे। तत्र प्रधानभूतयोः सर्वरूपकप्रसरणकारिणोर्नाटकप्रकरणयोर्लक्षणसांकर्ये दर्शिते सर्वरूपकाणां दर्शनं तद्भवतीत्यभिप्रायेण तदेव दर्शनीयम्। उद्देशक्रमानुसारेण तु तल्लक्षणविस्तरणे पुनस्तल्लक्षणपरामर्शे च गोरवमित्यभिप्रायेणार्यात्रयं पठतिप्रकरणनाटकभेदादित्यादि। नाट्यशास्त्रम्, १८.५२ उपरि अभिनवभारती, पृ. ८५.
15. नाटकं सप्रकरणं डिम ईहामृगोऽपि वा। ज्ञेयः समवकारश्च भवेत् प्रहसनन्तथा।।१।। व्यायोगभाणवीथ्यङ्गत्रोटकान्यथ नाटिका। सट्टकं शिल्पकः कर्णा दुर्म्मल्लिका तथा।।२।।
प्रस्थानं भणिका भाणी गोष्ठी हल्लीशकानि च। काव्यं श्रीगदितं नाट्यरासकं रासकं तथा।।३।।
उल्लाप्यकं प्रेङ्खणञ्च सप्तविंशतिरेव तत्। सामान्यञ्च विशेषश्च लक्षणस्य द्वयी गतिः।।४।। अग्निपुराणम् ३३८.१-४, पृ.७३३-७३४.
16. रूपकं तत्समारोपात् दशधैव रसाश्रयम्। दशरूपकम्, १.७.
-रसानाश्रित्य वर्तमानं दशप्रकारकम्, एवेत्यवधारणं शुद्धाभिप्रायेण। नाटिकायाः संकीर्णत्वेन वक्ष्यमाणत्वात्। तत्रोपरि अवलोकः, पृ. ४.
17. ननु – डोम्बी श्रीगदितं भाणो भाणीप्रस्थानरासकाः। काव्यं च सप्त नृत्यस्य भेदाः स्युस्तेऽपि भाणवत्।। तत्रैव, पृ.५.
18. लक्ष्यते नाटिकाप्यत्र सङ्कीर्णान्यनिवृत्तये। दशरूपकम्, ३.४३.
19. तत्रोपरि अवलोकः, पृ.१७१.
20. नाटकं प्रकरणं च नाटिका प्रकरण्यथ । व्यायोगः समवकारः भाणः प्रहसनं डिमः।
अङ्क ईहामृगो वीथी चत्वारः सर्ववृत्तयः। त्रिवृत्तयः परे त्वष्टौ कैशिकी-परिवर्जनात्।। नाट्यदर्पणम्, १.३-४. पृ. १५-१६.
21. तत्रैव २.५-७, पृ. २१३-२१४.
22. तत्र पाठ्यं भिनत्ति – पाठ्यं नाटक-प्रकरण-नाटिका-समवकारेहामृग-डिम-व्यायोगोत्सृष्टिकाङ्ग-प्रहसन-भाण-वीथी-सट्टकादि। - काव्यानुशासनम्, अष्टमोऽध्यायः, पृ.३७९.
23. रूपकत्वं तदारोपात्कमलारोपवन्मुखे। दशधैवेति मुनिना तद्भेदनियमः कृतः।
रसाश्रयत्वमप्युक्तं रसादेराश्रयत्वतः। तदेवं दशधा भिन्नं वाक्यार्थभिनयात्मकम्।।
रसाश्रया यद्यपि स्युर्नाटिकातोटकादयः। नाटकादिष्वथैतेषामन्तर्भावान्न ते पृथक्।
नाटके च प्रकरणे नाटिकायाः पुरातने। अन्तर्भावः कृतस्तस्यां तोटकस्यापि दर्शितः।
नाटिकाया नाटकस्याभेदः प्रकरणस्य वा।सट्टकतोटकस्यैव भेद इत्यभिधीयते।
तोटकस्योच्यते सद्भिरन्तर्भावोऽपि नाटके। नाटकादेरयं भेदो नाटिका रूपं भवेत्।
-भावप्रकाशने, नाट्येतिवृत्तशरीरलक्षणाभिधानं नाम सप्तमोऽधिकारः, पृ.१८०.
24. यद्यद्रसात्मकं तत्तद्वाक्यार्थाभिनयात्मकम्।यद्यद्भावाश्रयं तत्तत्पदार्थाभिनयात्मकम्।।
नृत्यं भावाश्रयं नृत्तं रसाश्रयमुदाहृतम्। नृत्यनृत्तविभागश्च बहुभिर्बहुधोदितः। तत्रैव, पृ.१८१
(२) दशरूपेण भिन्नानां रूपकाणामतिक्रमात्।अवान्तरभिदाः काश्चित्पदार्थाभिनयात्मिकाः।

ते नृत्यभेदाः प्रायेण सङ्ख्या विंशतिर्मताः। तोटकं नाटिका गोष्ठी सल्लापः शिल्पकस्तथा। तत्रैव, नवमोऽधिकारः, पृ. २५६.

25. साहित्यदर्पणम्, षष्ठः परिच्छेदः, कारिका ३-६, पृ.३७०

## संदर्भग्रन्थाः


1. अग्निपुराणम् (हिन्दीव्याख्योपेतम्), आचार्यशिवप्रसाद द्विवेदी, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली,२००४.
2. दशरूपकम्, (हिन्दीव्याख्योपेतम्), डॉ. भोलाशंकर व्यास, चौखम्बा विद्या भवन, वाराणसी, २००३.
3. दशरूपक-विधान, (मराठीव्याख्योपेतम्), प्रा. र. प. कंगले, महाराष्ट्र राज्य साहित्य संस्कृति मंडळ, मुं बई, १९७४
4. काव्यानुशासनम्, (सटीकम्), पंडीत शिवदत्त-काशीनाथौ, निर्णयसागर -यन्त्रालयम् , मुंबई, १९०१.
5. भावप्रकाशनम्, यदुगिरी-यतिराज-स्वामी, शास्त्री, के.एस. रामस्वामी, गायकवाड प्राच्यविद्या संशोधन संस्था, बडोदा, १९६८.
6. नाट्यदर्पणम्, (हिन्दीव्याख्योपेतम्),डॉ. नगेन्द्र, डॉ. ओझा दशरथ, डॉ. चौधरी सत्यदेव, हिन्दी विभाग, दिल्ली विश्वविद्यालय, दिल्ली,
7. साहित्यदर्पणम् (हिन्दीव्याख्योपेतम्), डॉ. सत्यव्रतसिंह, चौखम्बा विद्याभवन, वाराणसी, १९५७.
8. नाट्यशास्त्रम् (हिन्दीव्याख्योपेतम्), डॉ. पारसनाथ द्विवेदी, सम्पूर्णानन्द-संस्कृत-विश्वविद्यालय, वाराणसी, २००१.
9. Bhat GK. Natya-Manjari Saurabha, Bhandarkar Oriental Research Institute, Poona, 1981.
10. Mankad DR. The Types of Sanskrit Drama, Urmi Prkashan Mandir, Karachi, 1936.
11. Shastri SN. The Laws and Practice of Sanskrit Drama, Chowkhamba Publication, Varanasi, 1961.